# आचार्यप्रथमवर्षम्

## चतुर्थपत्रम्-प्राचीनन्यायवैशेषिकम्

## शैक्षिकनिष्पत्तिः

**ग्रन्थः ( -न्यायसारः)न्यायभूषणसहितः-आदितः केवलव्यतिरेकिनिरूपणान्तम्**

**अमुं पाठ्यग्रन्थमधीत्य छात्राः**

- ❖ग्रन्थादौ मङ्गलस्य अनुबन्धचतुष्टयस्य चावश्यकतां, प्रमाणलक्षणपरीक्षणं, संशयलक्षणस्वरूपविभागान्, ख्यातिवादपरीक्षणं, प्रमाणस्य परतोग्राह्यत्वव्यवस्थां, मतभेदेन करणपदार्थं, प्रमेयादीनां स्वरूपप्रयोजने न्यायजन्यज्ञानस्य मोक्षोपयोगित्वं च जानीयुः।
- ❖प्रमाणत्रैविध्यं, प्रमाणभेदे मतभेदं तन्निरासक्रमं, प्रत्यक्षलक्षणपरिशीलनं, स्मृतिप्रत्यक्षयोः अर्थजत्वं, अतीताद्यर्थस्य भावरूपत्वं, इन्द्रियाणां प्राप्यकारित्वपरिशीलनं, चित्ररूपोपपत्तिं ज्ञानार्थयोःसहोपलम्भनिरासं, ज्ञानस्य बाह्यत्व-स्वप्रकाशत्वनिरासक्रमं, स्वप्न-जागरितप्रत्ययवैलक्षण्यं चावगच्छेयुः ।
- ❖द्रव्य-गुणादिप्रत्यक्षं, कर्मणो गुणस्वरूपत्वं, पृथक्त्व-विभाग-परत्व-वेगादीनां गुणातिरिक्तत्वं, स्नेहस्य पृथिवीसाधारणत्वं, शब्दस्य स्वरूपविभागाश्रयान्, विशेषणविशेष्यभावसम्बन्धं मतभेदेन योगिप्रत्यक्षपरिशीलनं, मतभेदेन अनुमानलक्षणपरिशीलनं, अनुमानत्रैविध्यं, अनुमितेः लक्षणप्रामाण्ययोः परिशीलनं, व्याप्तिस्वरूप-तद्ग्रहतदुपायपरिशीलनं च ज्ञातुं शक्नुयुः ।
- ❖सामान्यतोदृष्टानुमाने सामान्यस्वरूपपरिशीलनम् प्रत्यभिज्ञायाः प्रामाण्यं, प्रत्यक्षस्य भेदनिश्चायकत्वं, धर्म-धर्मिणोः भेदप्रकारं, बौध्दाभिमतसत्यद्वयपरिशीलनं , पाचकादिपदस्य प्रवृत्तिनिमित्तं, सामान्य-विशेषादिपदार्थपरिशीलनं च अवगच्छेयुः ।
- ❖अनुमानद्वैविध्यं, स्फोटवादपरिशीलनं, वाक्यस्वरूपनिर्वचनं, अन्विताभिधानवादं, न्याय-तदवयवपरिशीलनं, कार्यकारणभावनिश्चयं, ‘‘पूर्ववत्’’ इति सूत्रपरिशीलनं, लिङ्गत्रैविध्यं, हेतोः पञ्चरूपाणि, हेत्ववयवलक्षणं च विजानीयुः।